श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ चतुर्विंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्विंशः सर्गः ॥

## विलपन्त्याः कौसल्याया आत्मानमपि वनं नेतुं श्रीरामं प्रत्याग्रहः, पत्युः सेवैव नारीणां धर्म इति प्रतिपाद्य श्रीरामेण तस्या निवारणं स्वकीयवनगमने तस्या अनुमतिग्रहणं च

तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने।
कौसल्या बाष्पसंरुद्धा वचो धर्मिष्ठमब्रवीत्॥ **2.24.1** ॥

अदृष्टदुःखो धर्मात्मा सर्वभूतप्रियंवदः।
मयि जातो दशरथात् कथमुञ्छेन वर्तयेत्॥ **2.24.2** ॥

यस्य भृत्याश्च दासाश्च मृष्टान्यन्नानि भुञ्जते।
कथं स भोक्ष्यते रामो वने मूलफलान्ययम्॥ **2.24.3** ॥

क एतच्छ्रद्दधेच्छ्रुत्वा कस्य वा न भवेद् भयम्।
गुणवान् दयितो राज्ञः काकुत्स्थो यद् विवास्यते॥ **2.24.4** ॥

नूनं तु बलवान् लोके कृतान्तः सर्वमादिशन्।
लोके रामाभिरामस्त्वं वनं यत्र गमिष्यसि॥ **2.24.5** ॥

अयं तु मामात्मभवस्तवादर्शनमारुतः।
विलापदुःखसमिधो रुदिताश्रुहुताहुतिः॥ **2.24.6** ॥

चिन्तावाष्पमहाधूमस्तवागमनचिन्तजः।
कर्शयित्वाधिकं पुत्र निःश्वासायाससम्भवः॥ **2.24.7** ॥

त्वया विहीनामिह मां शोकाग्निरतुलो महान्।
प्रधक्ष्यति यथा कक्ष्यं चित्रभानुर्हिमात्यये॥ **2.24.8** ॥

कथं हि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति।
अहं त्वानुगमिष्यामि यत्र वत्स गमिष्यसि॥ **2.24.9** ॥

यथा निगदितं मात्रा तद् वाक्यं पुरुषर्षभः।
श्रुत्वा रामोऽब्रवीद् वाक्यं मातरं भृशदुःखिताम्॥ **2.24.10** ॥

कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते।
भवत्या च परित्यक्तो न नूनं वर्तयिष्यति॥ **2.24.11** ॥

भर्तुः किल परित्यागो नृशंसः केवलं स्त्रियाः।
स भवत्या न कर्तव्यो मनसापि विगर्हितः॥ **2.24.12** ॥

यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः।
शुश्रूषा क्रियतां तावत् स हि धर्मः सनातनः॥ **2.24.13** ॥

एवमुक्ता तु रामेण कौसल्या शुभदर्शना।
तथेत्युवाच सुप्रीता राममक्लिष्टकारिणम्॥ **2.24.14** ॥

एवमुक्तस्तु वचनं रामो धर्मभृतां वरः।
भूयस्तामब्रवीद् वाक्यं मातरं भृशदुःखिताम्॥ **2.24.15** ॥

मया चैव भवत्या च कर्तव्यं वचनं पितुः।
राजा भर्ता गुरुः श्रेष्ठः सर्वेषामीश्वरः प्रभुः॥ **2.24.16** ॥

इमानि तु महारण्ये विहृत्य नव पञ्च च।
वर्षाणि परमप्रीत्या स्थास्यामि वचने तव॥ **2.24.17** ॥

एवमुक्ता प्रियं पुत्रं बाष्पपूर्णानना तदा।
उवाच परमार्ता तु कौसल्या सुतवत्सला॥ **2.24.18** ॥

आसां राम सपत्नीनां वस्तुं मध्ये न मे क्षमम्।
नय मामपि काकुत्स्थ वनं वन्यां मृगीमिव॥ **2.24.19**॥

यदि ते गमने बुद्धिः कृता पितुरपेक्षया।
तां तथा रुदतीं रामो रुदन् वचनमब्रवीत्॥ **2.24.20**॥

जीवन्त्या हि स्त्रिया भर्ता दैवतं प्रभुरेव च।
भवत्या मम चैवाद्य राजा प्रभवति प्रभुः॥ **2.24.21**॥

न ह्यनाथा वयं राज्ञा लोकनाथेन धीमता।
भरतश्चापि धर्मात्मा सर्वभूतप्रियंवदः॥ **2.24.22**॥

भवतीमनुवर्तेत स हि धर्मरतः सदा।
यथा मयि तु निष्क्रान्ते पुत्रशोकेन पार्थिवः॥ **2.24.23**॥

श्रमं नावाप्नुयात् किञ्चिदप्रमत्ता तथा कुरु।
दारुणश्चाप्ययं शोको यथैनं न विनाशयेत्॥ **2.24.24**॥

राज्ञो वृद्धस्य सततं हितं चर समाहिता।
व्रतोपवासनिरता या नारी परमोत्तमा॥ **2.24.25**॥

भर्तारं नानुवर्तेत सा च पापगतिर्भवेत्।
भर्तुः शुश्रूषया नारी लभते स्वर्गमुत्तमम्॥ **2.24.26**॥

अपि या निर्नमस्कारा निवृत्ता देवपूजनात्।
शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता॥ **2.24.27**॥

एष धर्मः स्त्रिया नित्यो वेदे लोके श्रुतः स्मृतः।
अग्निकार्येषु च सदा सुमनोभिश्च देवताः॥ **2.24.28**॥

पूज्यास्ते मत्कृते देवि ब्राह्मणाश्चैव सत्कृताः।
एवं कालं प्रतीक्षस्व ममागमनकाङ्क्षिणी॥ **2.24.29**॥

नियता नियताहारा भर्तृशुश्रूषणे रता।
प्राप्स्यसे परमं कामं मयि पर्यागते सति॥ **2.24.30** ॥

यदि धर्मभृतां श्रेष्ठो धारयिष्यति जीवितम्।
एवमुक्ता तु रामेण बाष्पपर्याकुलेक्षणा॥ **2.24.31** ॥

कौसल्या पुत्रशोकार्ता रामं वचनमब्रवीत्।
गमने सुकृतां बुद्धिं न ते शक्नोमि पुत्रक॥ **2.24.32** ॥

विनिवर्तयितुं वीर नूनं कालो दुरत्ययः।
गच्छ पुत्र त्वमेकाग्रो भद्रं तेऽस्तु सदा विभो॥ **2.24.33** ॥

पुनस्त्वयि निवृत्ते तु भविष्यामि गतक्लमा।
प्रत्यागते महाभागे कृतार्थे चरितव्रते।
पितुरानृण्यतां प्राप्ते स्वपिष्ये परमं सुखम्॥ **2.24.34** ॥

कृतान्तस्य गतिः पुत्र दुर्विभाव्या सदा भुवि।
यस्त्वां सञ्चोदयति मे वच आविध्य राघव॥ **2.24.35** ॥

गच्छेदानीं महाबाहो क्षेमेण पुनरागतः।
नन्दयिष्यसि मां पुत्र साम्ना श्लक्ष्णेन चारुणा॥ **2.24.36** ॥

अपीदानीं स कालः स्याद् वनात् प्रत्यागतं पुनः।
यत् त्वां पुत्रक पश्येयं जटावल्कलधारिणम्॥ **2.24.37** ॥

तथा हि रामं वनवासनिश्चितं
    ददर्श देवी परमेण चेतसा।
उवाच रामं शुभलक्षणं वचो
    बभूव च स्वस्त्ययनाभिकाङ्क्षिणी॥ **2.24.38** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे चतुर्विंशः सर्गः॥